इति राजनिर्घण्टः ॥

काकशीर्षः, पुं, (काकः शीर्षे अग्रेऽस्य । काकस्य तदग्रे वासयोग्यत्वात् ।) वकवृक्षः । इति जटाधरः ॥ (पर्य्यायोऽस्य यथा,—वैद्यकरत्नमालायाम् ।

"वकपुष्पः काकशीर्षः स्थूलपुष्पः शिवप्रियः ।
वसुकः काकनामा च वसुहट्टः खपूरकः" ॥)

काकस्फूर्ज्जः, पुं, (काकः स्फूर्ज्जति यत्र । काक + स्फूर्ज्ज + आधारे घञ् ।) काकतिन्दुकवृक्षः । इति राजनिर्घण्टः ॥

काका, स्त्री, (काकवदाकारोऽस्त्यस्या इति अच् ततष्टाप् ।) काकनासालता । काकोलीवृक्षः ॥ काकजङ्घावृक्षः । पर्य्यायो यथा भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।

"काकजङ्घा नदी कान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता" ॥

गुणादयोऽस्याः काकजङ्घाशब्दे बोद्धव्याः ॥) रक्तिकालता । मलपूवृक्षः । काकमाचीवृक्षः । इति मेदिनी ॥

काकाङ्गा, स्त्री, (काकस्य अङ्गं अङ्गमिवाकारो यस्याः वा ङीष् । पक्षे टाप् ।) काकाङ्गीवृक्षः । इत्यमरटीकायां रमानाथः ॥

काकाङ्गी, स्त्री, (काकस्य अङ्गं जङ्घा इव आकृतिर्य्यस्याः । ङीष् ।) काकजङ्घावृक्षः । इत्यमरः ।२। ४ ।१९८ । (अस्याः पर्य्यायो यथा,—भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।

"काकनासा तु काकाङ्गी काकतुण्डफला च सा" ॥)

काकाञ्ची, स्त्री, (काकं तज्जङ्घाकारं अञ्चति गच्छतीति । काक + अन्च् + अण् + ङीप् ।) काकजङ्घावृक्षः । इति शब्दरत्नावली ॥

काकाण्डः, पुं, (काक्या अण्ड इव फलं यस्य । काकीत्वस्य पुंवद्भावः ।) महानिम्बः । काकतिन्दुः । इति राजनिर्घण्टः ॥

("माषैः समानं फलमात्मगुप्त-
मुक्तञ्च काकाण्डफलन्तथैव" ॥

इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥ यस्मिन् व्यवह्रियते तद्यथा,—

"काकाण्डसुरसगवाच्या
पुनर्नवा वायसी शिरीषफलैः ।
उद्बुद्धविषजलम्रते
लेपौषधनस्यपानानि" ॥

इति चरके चिकित्सास्थाने । २५ अध्याये ॥)

काकाण्डा, स्त्री, (काकस्याण्डमिव वीजमस्याः ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

काकाण्डी, स्त्री, (काकाण्ड + गौरादित्वात् ङीष् ।) महाज्योतिष्मती लता । इति राजनिर्घण्टः ॥ (महाज्योतिष्मतीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

काकाण्डोला, स्त्री, (काकाण्डमोरति तत्सादृश्यं वीजे प्राप्नोतीति । उर गतौ + अच् । रस्य लत्वम् ।) कोलशिम्बी । इति राजनिर्घण्टः ॥

काकादनी, स्त्री, (काकैरद्यते भुज्यतेऽसौ इति । काक + अद + कर्म्मणि ल्युट् ततो ङीप् च ।) गुञ्जा । इति शब्दरत्नावली ॥ श्वेतगुञ्जा । इति राजनिर्घण्टः ॥ वृक्षविशेषः । कालियाकड़ा इति भाषा । तत्पर्य्यायः । हिंस्रा २ गृध्रनखी ३ तुण्डी ४ काला ५ अहिंस्रा ६ कटुका ७ पाशिः ८ कापालः ९ कुलिकः १० । इति रत्नमाला ॥ (अस्या व्यवहारो यत्र तद्यथा,—

"विकङ्कतारग्वधकाकगन्ती
काकादनीतापसवृक्षमूलैः ।
आलेपयेदेनम्" ॥

इति वैद्यकचक्रपाणिसंग्रहे गण्डमालाद्यधिकारे ॥ अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ॥

"श्वेता रक्तोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकानन्तीच रक्तिका ॥
काकादनी काकपीलुः सा स्मृता काकवल्लरी" ॥)

काकायुः, पुं, (काकस्य आयुर्यस्मात् ।) स्वर्णवल्ली । इति राजनिर्घण्टः ॥

काकारिः, पुं, (काकः अरिर्यस्य । काकस्यारिर्व्वा ।) पेचकः । इति हेमचन्द्रः ॥

काकालः, पुं, (का इति शब्दं कलते रौति । का + कल + अण् ।) द्रोणकाकः । इति शब्दरत्नावली ॥

काकिणी, स्त्री, (कक लौल्ये । ककते गणनाकाले चञ्चलीभवतीति । कक + णिनि + ङीप् । पृषोदरादित्वात् नस्य णः ।) पणचतुर्थांशः । पाँच गण्डा कड़ि इति भाषा ॥ यथाह लीलावती ।

"वराटकानां दशकद्वयं यत् सा काकिणी" ॥)

मानदण्डः । काठा नल इत्यादि भाषा । कृष्णला । कुँच इति भाषा । एकवराटी । एक कड़ा इति भाषा ।

("तस्मात्ययं काकिणीं वा फलं पुष्पमथापि वा ।
प्रदद्याद् दक्षिणां यत्ते यथा स सफलो भवेत्" ॥

इति मुद्रितत्त्वे वृहस्पतिः ॥) उन्मानस्यांशकः । इति मेदिनी ॥

काकिनी, स्त्री, (कक लौल्ये । ककते गणनाकाले चञ्चलीभवतीति । कक + णिनि + ङीप् ।) काकिणी । इत्यमरटीकायां रायमुकुटः ॥ (यथा,—पञ्चतन्त्रे २ । ७४ ।

"ईश्वरा भूरिदानेन यल्लभन्ते फलं किल ।
दरिद्रस्तच्च काकिन्या(ण्या)प्राप्नुयादिति नःश्रुतिः" ॥)

काकिलः, पुं, (कु—ईषत् किलतीति । कु + कृ + कः । कोः कादेशः रस्य लत्वम् ।) काकलः । कण्ठमणिः । इति शब्दमाला ॥

काकुः, स्त्री, (कक लौल्ये + उण् ।) शोकभयादिभिर्ध्वनिविकारः । इत्यमरः । १ । ६ । १२ ॥ (यथा, साहित्यदर्पणे । २ । २३ ।

"भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते" । इति काकुं लक्षीकृत्य उदाहरणं यथा, तत्रैव

"गुरुपरतन्त्रतया वत दूरतरं देशमुद्यतो गन्तुम् । अलिकुलकोकिलललिते नैष्यति सखि! सुरभिसमयेऽसौ ॥ नेष्यति, अपि तु एष्यति एवेति काका व्यज्यते" ॥) जिह्वा । इति त्रिकाण्डशेषः ॥

काकुत्स्थः, पुं, (ककुत्स्थस्य नृपतेरपत्यम् । शिवादित्वात् ४ । १ । ११२ । अण् ।) श्रीरामचन्द्रः । इति रामायणम् ॥ (यथा, रघुः १२ । ४६ ।

"असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम् ।
न चक्षमे शुभाचारः स दूषणमिवात्मनः" ॥

ककुत्स्थवंशोद्भवमात्रम् । अजराजार्थे यथा रघुवंशे ६ । २ ।

"काकुत्स्थमालोकयतां नृपाणां
मनो बभूवेन्दुमतीनिराशम्" ॥

दशरथार्थे यथा रामायणे ६ । १०५ । १ ।

"प्रतिष्ठयाते काकुत्स्थे महेन्द्रः पाकशासनः" ॥

ककुत्स्थ एव स्वार्थे अण् । पुरा किल महोक्षरूपधारिणो महेन्द्रस्य ककुदि स्थित्वा असुरान् जितवानतोऽस्य तथात्वम् ।) पुरञ्जयराजः । इति त्रिकाण्डशेषः ॥ (विवरणन्तु ककुत्स्थशब्दे द्रष्टव्यम् ॥)

काकुदं, क्ली, (काकुं ददातीति । काकु + दा + क ।) तालु । इत्यमरः २ । ६ । ९१ ॥

काकेक्षुः, पुं, (काशमीषज्जलमत्र कोः कादेशः । ततः कर्म्मधारयः ।) खग्गड़ः । इति रत्नमाला त्रिकाण्डशेषश्च ॥ खागड़ा आक् इति भाषा ॥ काशः । इति राजनिर्घण्टः ॥

काकेन्दुः, पुं, (काकस्य इन्दुराह्लादकः ।) कुलकवृक्षः माकड़ा केन्दु इति ख्यातः । इत्यमरः ।२। ४।३९॥

काकेष्टः, पुं, (काकस्य इष्टः ।) निम्बवृक्षः । इति राजनिर्घण्टः ॥ (निम्बशब्देऽस्य गुणादयो ज्ञेयाः ॥)

काकोचिकः, पुं, (कु ईषत् कोची सङ्कोचो । कुच + णिन् स्वार्थे कन् । कोः कादेशः ।) काकोची मत्स्यः । इति हारावली ॥ काउची इति भाषा ॥

काकोची, स्त्री, (काकोच + ङीष् ।) काकोचिमत्स्यः । इति हारावली ॥

काकोडुम्बरः, पुं, (काकप्रियः उडुम्बरः इति मध्यपदलोपी कर्म्मधारयः ।) काकोडुम्बरिका । इति शब्दरत्नावली । काकडुमुर इति भाषा ॥

काकोडुम्बरिका, स्त्री, (काकोडुम्बरस्ततः स्वार्थे कन् टाप् च अत इत्वम् ।) वृक्षविशेषः । कोठडुमुरि डुमुरि इति च ख्याता । काकडुमुर इति भाषा । तत्पर्य्यायः । फल्गुः २ मलपूः ३ जघनेफला ४ । इत्यमरः ।२।४।६२ ॥ मलयुः ५ फल्गुफला ६ काकोडुम्बरः ७ । इति शब्दरत्नावली ॥ फलवाटिका ८ बहुफला ९ । इति जटाधरः ॥ अस्या गुणाः । काकोदुम्बरिकाशब्दे द्रष्टव्याः ॥ (अस्याः व्यवहारो यत्र तद्यथा,—वैद्यकचक्रपाणिसंग्रहे मुखरोगाधिकारे ।

"काकोडुम्बरिका गोजी पत्रैर्विस्रावयेद्भिषक् ।
चौद्रयुक्तैश्च लवणैः सव्योषैः प्रतिसाधयेत्" ॥)

काकोदरः, पुं, (कु कुत्सितं अकति । कु + अक वक्रगतौ + अच् । कोः कादेशः । काकं कुटिलगतिकारि उदरं यस्य बहुव्रीहिः ।) सर्पः । इत्यमरः । १ । ८ । ७ ॥ (यथा, राघवपाण्डवीये ।

"यः पूतनामारणलब्धवर्णः
काकोदरो येन विनीतदर्पः ।
यशोदयालङ्कृतमूर्त्तिरव्या-
च्छौरी यदूनामथवा रघूणाम्" ॥)

काकोदुम्बरिका, स्त्री, (काकप्रिया कृष्णा वा उदुम्ब-